# Shri Yamunashtakam 7

# श्रीयमुनाष्टकम् ७

## Document Information

Text title : yamunAShTakam 7

File name : yamunAShTakam7.itx

Category : devii, nadI, aShTaka, devI

Location : doc_devii

Author : Vanamalishastri

Proofread by : NA

Latest update : January 15, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# श्रीयमुनाष्टकम् ७

त्वयि स्नाता ध्याता तव सलिलपाता नमयिता
स्तुतेः कर्ता धर्ता तव रजसि मर्ता रविसुते ।
न चैवाख्यां वक्ता शमनसदने याति यमुने
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ १॥

मुरारातेः कायप्रतिमललितं वारि दधतीं
कलिन्दाद्रेः शृङ्गादपि पतनशीलां गतिमतीम् ।
स्वपादाब्जं ध्यातुर्जनिमरणशोकं वितुदतीं
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ २॥

कदम्बानां पुष्पावलिभिरनिशं रूषितजलां
विधीन्द्राद्यैर्देवैर्मुनिजनकुलैः पूजितपदाम् ।
भ्रमद्गोगोधुग्भिर्विहगनिकरैर्भूषिततटां
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ ३॥

रणद्भृङ्गश्रेणीविकसितसरोजावलियुतां
तरङ्गान्तर्भ्राम्यन्मकरसफरीकच्छपकुलाम् ।
जलक्रीडद्रामानुजचरणसंश्लेषरसिकां
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ ४॥

तरुश्रेणीकुञ्जावलिभिरभितः शोभिततटां
महोक्षाणां शृङ्गावलिभिरभितो मर्दिततटाम् ।
स्थितां वृन्दाटव्यां सततमभितः पुष्पितवनां
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ ५॥

निशायां यस्यां बिम्बितममलतारागणमहो
विलोक्योत्कण्ठन्ते सकलसफरा अत्तुमनिशम् ।
विकीर्णं लाजानां निकरमिति मत्वा सरभसं
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ ६॥

शरन्मेघच्छाया सकलमनुजैर्यत्सलिलगा
हरेः स्वस्यामाप्तुं स्नपनमिति बुध्या सरभसम् ।
किमायाता गर्भे सुरसरिदहो तर्क्यत इति
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ ७॥

नृणामीक्षामात्रादपि सकलसौख्यं विदधती-
मनायासेनैवाखिलभुवनभोग्यं प्रददतीम् ।
स्वकान्तीनां व्यूहैर्बलभिदुपलं चापि तुदतीं
नमामस्त्वां नित्यां सकलगुणयुक्तां रविसुताम् ॥ ८॥

ममैषा विज्ञप्तिः पदकमलयोस्ते तरणिजे
बटे हा भाण्डीरे तव विमलतीरे निवसतः ।
हरे कृष्णेत्युच्चैरपि च तव नामानि गदतः
सदा वृन्दारण्ये जननि जननं यातु मम वै ॥ ९॥

किमायाता कालः स इह जनने मे हतविधे-
र्यदायातः कृष्णो मधुमधुरवाङ्निर्झरजलैः ।
श्रुतेर्मार्गे सिञ्चन्करकमलयुग्मेन सहसा
मदङ्गं स्वाङ्गे हा व्रततिमिव वृक्षो गमयिता ॥ १०॥

इदं स्तोत्रं प्रातः पठति यमुनायाः प्रतिदिनं
शरीरी यस्तस्योपरि भवति प्रीता रविसुता ।
हरेः प्रेष्ठो भूत्वा हरिचरणभक्तिं च लभते
भुवो भोगान्मुक्त्वा व्रजति मरणान्ते हरिपदम् ॥ ११॥

इति श्रीवनमालिशास्त्रिविरचितं श्रीयमुनाष्टकम् ।

*Shri Yamunashtakam 7*
pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*